# शब्दविमर्शः - रप्रत्ययान्तशब्दानामवलोकनम्।

## 7. दीप्रः।

‘तं जागरूकः कार्येषु दन्दशूकरिपुं कपिः। अकम्प्रं मारुतिर्दीप्रं नम्रः प्रावेशयद् गुहाम्।।’ (7.23)। तं लक्ष्मणं कपिर्मारुतिः गुहां प्रावेशयत्। कार्येषु जागरूकः = कृत्येषु जागरितः। दन्दशूकरिपुं = हिंस्रारिम्। दीप्रं = साधु दीप्यमानम्। अकम्प्रम् = अकम्पनशीलं अभीरुमित्यर्थः। नम्रः = साधु प्रह्वीभूतः। श्रुतपूर्वमिदं पद्यम्। सत्यम्। भट्टिकाव्यस्य सीतान्वेषणं नाम्नः सप्तमः सर्गात् रप्रत्ययान्तान् शब्दानुदाहर्तुमुपात्तः। श्लोके विद्यमानाः रप्रत्ययान्ताः प्रायः प्रगुक्ताः। दीप्रशब्दोऽवशिष्टः। सर्वत्र ‘नमिकम्पिस्म्यजसकमहिंसदीपो रः’ (3.2.167) इति रप्रत्ययः। तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु विहितोऽयं रप्रत्ययः। एतन्मनसिकृत्यैव साधु दीप्यमानमित्युपरिष्टादुक्तम्।

अस्मिन्नेव काव्ये श्रीरामसम्भवं वर्णयन् भट्टिः प्रथमे सर्गे ‘आशीर्भिरभ्यर्च्य मुनिः क्षितीन्द्रं प्रीतः प्रतस्थे पुनराश्रमाय। तं पृष्ठतः प्रष्ठमियाय नम्रो हिंस्रेषु दीप्राप्तधनुः कुमारः।।’ (1.24) रामगमनस्यानुज्ञातत्वात् प्रीतो मुनिः राजानमाशीर्भिरभ्यर्च्य आश्रमं पुनः प्रस्थितवान्। प्रष्ठम् = अग्रयायिनं तम्। पृष्ठतः = पश्चात्। कुमारः श्रीरामः लक्ष्मणान्वितोऽनुगतः। कथंविधः इत्युक्तौ नम्रोऽनुकूलः। हिंसनशीला इषवः शराः हिंस्रेषवः। अथवा हिंस्रेषु दीप्रमाप्तं धनुर्यस्य कुमारस्येति विग्रहः। दीप्रमस्त्रं धृष्टतया यस्य धनुषस्तद्दीप्रास्त्रं धनुर्यस्येति सः। कस्मिन्विषये। हिंस्रेषु नान्येषु। दीप्रशब्दमुदाहर्तुमयपि प्रयासः। नम्रादयः सर्वेऽपि शब्दाः प्राग्वद् रप्रत्ययान्ताः। एवमन्यत्रापि ‘व्रातीनव्यालदीप्रास्त्रः सुत्वनः परिपूजयन्’ इति भट्टिः।

एवं कथासरित्सागरे कञ्चित् श्मशानं वर्णयति ‘शिवावकीर्णपिशितप्रत्तसन्ध्यामहाबलि। क्वचित् क्वचिच्चिताज्योतिर्दीप्रदीपप्रकाशितम्।।’ (25.135) इति।

कृत्सु विहितस्यायं रप्रत्ययस्य सामान्येन विवरणम्। तद्धिते उणादावप्ययं रप्रत्ययो बहुविषयकः। तद्विवरणमग्रे संक्षेपेण करिष्यते।

***

## 8. ऊषरः।

अये दुस्तरोऽयमारम्भः योऽसौ भवान् तद्धितेषु प्रतिपदव्याख्यानाय समुद्यतः। को दोषः। तेभ्यो हितास्तद्धिताः। तदित्यनेन लौकिका वैदिकाश्च शब्दाः प्रत्यवमृश्यन्ते। तेषां व्युत्पाद्यत्वेन प्रकृतत्वात्। अर्थाद् व्युत्पाद्यत्वेन स्थितेभ्यो लौकिकवैदिकशब्देभ्योऽपत्यादिष्वर्थेषु हितास्तद्धिताः इति फलति। महान् शब्दस्य प्रयोगविषयः। तेषां दिङ्मात्रमिह व्याकरणे प्रक्रिया वर्ण्यते। असंख्याकानामेतेषामपत्यादिष्वनवधिकेष्वर्थेषु प्रयोगानुसन्धानं नाम कृच्छ्रसाध्यं कर्म। उणादयोऽव्युत्पन्नानि प्रातिपदिकानि। तेषां व्युत्पत्तिरपि सम्पूर्णा दर्शयितुमशक्या। अतस्तद्धितेषूणादिषु च रप्रत्ययान्तेषु द्वित्राण्येवोदाहृत्य विरमिष्यते।

राजसूयक्रतुप्रस्तावः श्रीकृष्णं प्रत्यर्घदानं भीष्मकृता श्रीकृष्णस्तुतिश्च शिशुपालवधस्य चतुर्दशसर्गे वर्णनाविषयाः। 'निर्गुणोऽपि न विमुखो न भूपते दानशौण्डमनसः पुरोऽभवत्। वर्षुकस्य किमपः कृतोन्नतेरम्बुदस्य परिहार्य मूषरम्।।'(14.46)। दानशौण्डमनसो दानशूरचित्तस्य। बहुप्रदस्येत्यर्थः। भूपतेः पुरोऽग्रे निर्ग ुणस्तपोविद्यादिगुणहीनोऽपि विमुखो निष्फलो नाभवत् किन्तु पूर्णकाम एवाभवत्। अत एव तेनापात्रवर्षदोषोऽपि न कारुण्यवृत्तेरित्याशयेनोदाहरति वर्षुकस्य वर्षणशीलस्य। अपो जलानि। कृतोन्नतेः कृतोदयस्याम्बुदस्य। अम्बुदेनेत्यर्थः। तद्वत्क्षेत्रमूषरम्। परिहार्यं त्याज्यं किम्। नेत्यर्थः। वृष्टेः उर्वरोषरभेदो नास्तीति भावः। 'उर्वरा सर्वसस्याढ्या स्यादूषः क्षारमृत्तिका ऊषवानूषरो द्वावप्यन्यलिङ्गौ स्थलं स्थली।' इत्यमरः। ऊषरशब्दः परामृश्यते। रप्रत्ययान्तस्तद्धितः। 'ऊषसुषिमुष्कमधो रः' (5.2.107) इति विहितस्तद्धितो मत्वर्थीयः। 'तदस्यास्त्यस्मिन्निति मतुप्' (5.2.94) इत्यारभ्य 'प्राग्दिशो विभक्तिः' (5.3.1) इति यावत् मत्वर्थीयाः। धनमस्यास्तीति धनवान्। दण्डिनोऽस्यां सन्तीति दण्डिमती शाला। इत्येवं मतुप उदाहरणानि। एतदधिकरणान्तर्ग तोऽयं रः। 'स्यादूषः क्षारमृत्तिका' इत्युक्तम्। तदस्त्यस्मिन्निति ऊषरं क्षेत्रम्। एवं सुषिरं काष्ठम्। मुष्करः पशुः। मधुरो गुडः इत्येवं सूत्रोक्तान्यन्यशब्दानि ज्ञेयानि।

'धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा। तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे'। इति मनुः (2.112)। 'विद्यते ज्ञायते यया सर्वोऽर्थ इति सा 'विद्या' पाठोऽर्थावबोधश्च। ऊषरो भूमिभाग उच्यते यस्मिन्नखिलेऽपि मृत्तिकादोषाद्वीजं न प्ररोहति' इति तत्रैव मेधातिथिभाष्यम्।

***